# श्रीमद् भागवत रसिक कुटुंब

## ॥ श्री गीत गोविंद॥



### ॥ पञ्चमः सर्गः ॥ (साकां(ङ्)क्षपुण्डरीकाक्षः)

(जगती)

अहमिह निवसामि याहि राधा-

मनुनय मद्वचनेन चानयेथाः ।

इति मधुरिपुणा सखी नियुक्ता,

स्वयमिदमेत्य पुनर्जगाद राधाम् ॥ 1॥

### ॥ गीतम् 10॥

(अथ दशमप्रबन्धो वराडिरागेण रूपकताले गीयते)

वहति मलयसमीरे मदनमुपनिधाय ।

स्फुटति कुसुमनिकरे विरहिहृदयदलनाय ॥

तव विरहे वनमाली सखि! सीदति ॥ 1॥

दहति शिशिरमयूखे मरणमनुकरोति ।

पतति मदनविशिखे विलपति विकलतरोऽति ॥ 2॥ तव विरहे

ध्वनति मधुपसमूहे श्रवणमपि दधाति ।

मनसि वलितविरहे  निशि निशि रुजमुपयाति ॥ 3॥ तव विरहे

वसति विपिनविताने त्यजति ललितधाम ।
लुठति धरणिशयने बहु विलपति तव नाम ॥ 4॥ तव विरहे

रटति पिकसमुदाये प्रतिदिशमनुयाति ।
हसति मनुजनिचये विरहमपलपति नेति ॥ 5॥ तव विरहे

स्फुरति कलरवरावे स्मरति भणितमेव ।
तव रतिसुखविभवे बहुगणयति गुणमतीव ॥ 6॥ तव विरहे

त्वदभिदशुभदमासं(वँ) वदतु नरि शृणोति ।
तमपि जपति सरसं(म्) परयुवतिषु न रतिमुपैति ॥ 7॥ तव विरहे

भणति कविजयदेवे विरहिविलसितेन ।
मनसि रभसविभवे हरिरुदयतु सुकृतेन ॥ 8॥ तव विरहे

(शार्दूलविक्रीडितेन)
पूर्वं यत्र समं(न्) त्वया रतिपतेरासादिताः(स्) सिद्धयस्-
तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे पुनर्माधवः ।
ध्यायं(म्)स्त्वामनिशं(ञ्) जपन्नपि तवैवालापमन्त्रावलीं(म्)
भूयस्त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं(वँ) वाञ्छति ॥ 1॥

## ॥ गीतम् 11 ॥

(अथ एकादशप्रबन्धः(ख्) केदाररागेण एकतालीताले गीयते)

रतिसुखसारे गतमभिसारे मदनमनोहरवेशम् ।
न कुरु नितम्बिनि गमनविलम्बनमनुसर तं(म्) हृदयेशम् ॥
धीरसमीरे यमुनातीरे वसति वने वनमाली
गोपीपीनपयोधरमर्दनचञ्चलकरयुगशाली ॥ 1॥

नाम समेतं(ङ्) कृतसं(ङ्)केतं(वँ) वादयते मृदुवेणुम् ।
बहु मनुतेऽतनु ते तनुसं(ङ्)गतपवनचलितमपि रेणुम् ॥ 2॥
धीरसमीरे

पतति पतत्रे विचलति पत्रे शङ्कितभवदुपयानम् ।
रचयति शयनं(म्) सचकितनयनं(म्) पश्यति तव पन्थानम् ॥ 3॥
धीरसमीरे

मुखरमधीरं(न्) त्यज मञ्जीरं(म्) रिपुमिव केलिसुलोलम् ।
चल सखि कुञ्जं(म्) सतिमिरपुञ्जं(म्) शीलय नीलनिचोलम् ॥ 4॥
धीरसमीरे

उरसि मुरारेरुपहितहारे घन इव तरलबलाके ।
तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके ॥ 5॥
धीरसमीरे

विगलितवसनं(म्) परिहृतरसनं(ङ्) घटय जघनमपिधानम् ।
किसलयशयने पङ्कजनयने निधिमिव हर्षनिदानम् ॥ 6॥
धीरसमीरे

हरिरभिमानी रजनिरिदानीमियमपि याति विरामम् ।
कुरु मम वचनं(म्) सत्वररचनं(म्) पूरय मधुरिपुकामम् ॥ 7॥
धीरसमीरे

श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयम् ।
प्रमुदितहृदयं(म्) हरिमतिसदयं(न्) नमत सुकृतकमनीयम् ॥ 8॥
धीरसमीरे

(हरिणी)

विकिरति मुहुः(श्) श्वासानाशाः(फ्) पुरो मुहुरीक्षते
प्रविशति मुहुः(ख्) कुञ्जं(ङ्) गुञ्जन्मुहुर्बहु ताम्यति ।
रचयति मुहुः(श्) शय्यां पर्य्याकुलं(म्) मुहुरीक्षते
मदनकदनक्लान्तः(ख्) कान्ते प्रियस्तव वर्तते ॥ 1॥

(शार्दूलविक्रीडितेन)

त्वद्वाक्येन समं(म्) समग्रमधुना तिग्मांशुरस्तं(ङ्) गतो
गोविन्दस्य मनोरथेन च समं(म्) प्राप्तं(न्) तमः(स्) सान्द्रताम् ।
कोकानां(ङ्) करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना
तन्मुग्धे विफलं(वँ) विलम्बनमसौ रम्योऽभिसारक्षणः ॥ 2॥

## (शार्दूलविक्रीडितेन)

आश्लेषादनु चुम्बनादनु नखोल्लेखादनु स्वान्तज-
प्रोद्बोधादनु सम्भ्रमादनु रतारम्भादनु प्रीतयोः ।
अन्यार्थं(ङ्) गतयोर्भ्रमान्मिलितयोः(स्) सम्भाषणैर्जानतोर्-
दम्पत्योरिह को न को न तमसि व्रीडाविमिश्रो रसः ॥ 3॥

## (हरिणी)

सभयचकितं(वँ) विन्यस्यन्तीं(न्) दृशौ तिमिरे पथि
प्रतितरु मुहुः(स्) स्थित्वा मन्दं(म्) पदानि वितन्वतीम् ।
कथमपि रहः(फ्) प्राप्तामङ्गैरनङ्गतरङ्गिभिः(स्)
सुमुखि ! सुभगः(फ्) पश्यन् स त्वामुपैतु कृतार्थताम् ॥ 4॥

## (शार्दूलविक्रीडितेन)

राधामुग्धमुखारविन्दमधुपस्त्रैलोक्यमौलिस्थली
नेपथ्योचितनीलरत्नमवनीभारावतारक्षमः ।
स्वच्छन्दं(वँ) व्रजसुन्दरीजनमनस्तोषप्रदोषश्चिरं(ङ्)
कं(म्)सध्वं(म्)सनधूमकेतुरवतु त्वां(न्) देवकीनन्दनः ॥ 5॥

॥ इति श्रीगीतगोविन्देऽभिसारिकावर्णने साकाङ्क्षपुण्डरीकाक्षो नाम
पञ्चमः सर्गः ॥

